## शिक्षाशास्त्रिप्रथमवर्षम्

## प्रथमपत्रम्

## दर्शन- समाजशास्त्रयोः परिप्रेक्ष्ये शिक्षा

पूर्णाङ्काः- 100

**Course Code: SS 1 1501**

**शैक्षिकनिष्पत्तिः (Learning Outcomes) –**

अमुं पाठ्यक्रमम् अधीत्य छात्राध्यापकाः -

- उदयमानभारतीयसमाजाधारित-दार्शनिकसामाजिकसांस्कृतिकपरम्पराणाम् आदर्शान् मूल्यानि चाधिगन्तुं शक्नुयुः ।
- भारतीयशिक्षायां संवैधानिकव्यवस्थानाम् आत्मसात्करणे समर्थाः भवेयुः।
- भारतीयशिक्षायाः बहुमुखविकासस्य दार्शनिकविषयाणामवबोधे समर्थाः जायेरन्।
- आधुनिकभारतीयसमाजस्य प्रकृतेः ज्ञानमवाप्तुं योग्याः स्युः।
- शिक्षायाः समसामयिकचिन्तनबिन्दून् सम्प्राप्तुं योग्यताम् अवाप्नुयुः।
- शिक्षा मानवानाम् अमूल्यनिधिः इति अवगन्तुं शक्नुयुः।
- शिक्षासम्बद्धाधिकाराणां विषये प्रबुद्धाः जायेरन् ।
- शिक्षायाः दार्शनिकसामाजिकाधारान् बोद्धुं पारयेयुः।